# चण्डीकवचम् ( पुरुष हेतु )

**अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः , अनुष्टुप् छन्दः , चामुण्डा देवता , अङ्गन्यासोक्तमातरो बीजम् , दिग्बन्धदेवतास्तत्त्वम् , श्रीजगदम्बाप्रीत्यर्थे मम सपरिवारस्य रक्षणार्थे च पाठे विनियोगः ।**

---

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ।
महाबले महोत्साहे महाभयविनाशिनी ॥ १६॥

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्याम् अग्निदेवता ॥ १७॥

दक्षिणेऽवतु वाराही नैरृत्यां खड्गधारिणी ।
प्रतीच्यां वारुणी रक्षेत् वायव्यां मृगवाहिनी ॥ १८॥

उदीच्यां रक्ष कौबेरि ऐशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणी मे रक्षेत् अधस्ताद् वैष्णवी तथा ॥ १९॥

एवं दश दिशो रक्षेत् चामुण्डा शववाहना ।
जया मे अग्रतः स्थातु विजया स्थातु पृष्ठतः ॥ २०॥

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखां मे द्योतिनी रक्षेत् उमा मूर्ध्नि व्यवस्थिता ॥ २१॥

मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥ २२॥

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी ॥ २३॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥ २४॥



स्वामी रुपेश्वरानंद आश्रम

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।

घण्टिकां चित्रघण्टा च महामाया च तालुके ॥ २५॥

कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ।

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ २६॥

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।

स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥ २७॥

हस्तयोर्दण्डिनी रक्षेत् अम्बिका चाङ्गुलीस्तथा ।

नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेन्नलेश्वरी ॥ २८॥

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ।

हृदये ललितादेवी उदरे शूलधारिणी ॥ २९॥

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।

पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥ ३०॥

कट्यां भगवती रक्षेत् जानुनी विन्ध्यवासिनी ।

जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी ॥ ३१॥

गुल्फयोर्नारसिंही च पादपृष्ठे तु तेजसी ।

पादाङ्गुलीः श्रीर्मे रक्षेत्पादाधस्तलवासिनी ॥ ३२॥

नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।

रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ ३३॥

रक्तमज्जावमांसान् अस्थिमेदांसी पार्वती ।

अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ ३४॥



स्वामी रुपेश्वरानंद आश्रम

पद्मावती पद्मकोशे कफे चुडामणिस्तथा ।

ज्वालामुखी नखज्वाला अभेद्या सर्वसन्धिषु ॥ ३५॥

शुक्रं ब्रह्माणी मे रक्षेत् छायां छत्रेश्वरी तथा ।

अहङ्कारं मनो बुद्धिं रक्ष मे धर्मचारिणि ॥ ३६॥

प्राणापानौ तथा व्यानमुदानं समानकम।

वज्रहस्ता च मे रेक्षेत्प्राणं कल्याणशोभना ॥ ३७॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।

सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ ३८॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।

यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ ३९॥

गोत्रमिन्द्राणी मे रक्षेत्पशून्मे रक्ष चण्डिके ।

पुत्रान् रक्षेन्महालक्ष्मी र्भार्यां रक्षतु भैरवी ॥ ४०॥

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।

राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥ ४१॥

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।

तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ ४२॥

संशोधित:

**द्वारा,**

**स्वामी रुपेश्वरानंद आश्रम,**

**बलुआघाट, जिला - चंदौली - वाराणसी ( उत्तर प्रदेश ) - 232109**

**Mo. No.: +91 -7607 233 230 ; Email : swamirupeshwar@gmail.com**



स्वामी रुपेश्वरानंद आश्रम